Shloka
(in devanagari)

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥ ३.२७ ॥

(in English)

prakṛtēḥ kriyamāṇāni guṇaiḥ karmāṇi sarvaśaḥ |
ahaṅkāravimūḍhātmā kartāhamiti manyatē || 3.27 ||

Index Ref 3rd chapter,27 of 43

पदच्छेदः प्रकृतेः,क्रियमाणानि,गुणैः,कर्माणि,सर्वशः ।
अहङ्कारविमूढात्मा,कर्ता,अहम्,इति,मन्यते ॥

अन्वयार्थः (Prose order with meaning & introduction to the word)

अहङ्कारविमूढात्मा	अहङ्कारविवशात्मा	one whose understanding is deluded by egoism
प्रकृतेः	स्वभावस्य	Of the Prakrti
गुणैः	द्रयादिभिः विकारैः,सत्वरजस्त	by the Gunas
सर्वशः	सर्वप्रकारेण	everywhere
क्रियमाणानि	विधीयमानानि,आचर्यमाणानि	are performed
कर्माणि	कर्माणि	works
कर्ता	आचरिता,अधिकारी,यजमानः	doer
अहम् इति	अहमेव इति	Thus I
मन्यते	चिन्तयति	thinks

अर्थः अहङ्कारविमूढात्मा प्रकृतेः गुणैः सर्वशः क्रियमाणानि कर्माणि कर्ता अहम् इति मन्यते ।

Meaning The Gunas of Prakrti perform all action. With the understanding deluded by egoism, man thinks "I am the doer".

तात्पर्यं देहेन्द्रियादयः सर्वेऽपि प्रकृतेः विकारभूताः । ते एव कर्माणि कुर्वन्ति न तु आत्मा । अयं पुनः आत्मा यदा प्रकृतिजन्येन अहङ्कारेण युक्तः भवति तदा अहमेव सर्वेषां कर्मणां कर्ता इति जानाति ।

व्याकरणम्

सन्धिः कर्ताहम् - कर्ता + अहम् सवर्णदीर्घसन्धिः

समासः अहङ्कारविमूढात्मा - अहङ्कारेण विमूढः अहङ्कारविमूढः - तृतीयातत्पुरुषः ।
- अहङ्कारविमूढः आत्मा यस्य सः - बहुव्रीहिः ।

कृदन्तः प्रकृतेः - प्र + कृ + क्तिन् (कर्तरि), तस्याः प्रकरोति इति प्रकृतिः ।
क्रियमाणानि - कृ + कर्मणि लट्, शानच् ।

तद्धितान्तः सर्वशः सर्व + शस् (प्रकारार्थे) ।